संस्कृत स्तोत्रं

ग्रं. १६०

कार्तवीर्यस्तोत्रं

६९८/स्तो १८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणपतयेनमः॥ अस्यश्रीकार्तवीर्यार्जुनस्तोत्र
मंत्रस्य॥ दत्तात्रय ऋषिः॥ अनुष्टुपछंदः॥ श्रीकार्त
वीर्यार्जुनोविष्णुरवतार देवता॥ नानाविधानिछं
दांसि॥ ॐ क्रोबीजं स्वाहाशक्तिः॥ क्लींकिलकं मनोभि
लषितसिद्धिद्वारा श्रीकार्तवीर्यप्रीत्यर्थं जपे विनियो
गः॥ ॐ क्रों अंगुष्ठाभ्यां नमः॥ ॐ क्लींतर्जनी॰॥ ॐ
स्वाहामध्यमाभ्यां॰ ॐ क्रो अनामिकाभ्यां॰ ॐ क्लीं
कनिष्ठिका॰ ॐ स्वाहा करतलकरपृष्ठाभ्यां॰ ॥
एवं हृदयादिषडंगं कुर्यात॥ हे कार्तवीर्य ॐ क्रों क्लीं

(2)

क्लीं भ्रं आं ह्रीं क्रों श्रीं हुं सुदर्शनसहस्त्रार हुं फट् इति
व्यापकत्रयं कृत्वा ॥ ॐ भूर्भुवःस्वरोमिति दिग्बंधः ॥
ईश्वर उवाच ॥ कार्तवीर्य महावीर्य सर्वदुष्टविनाशन ॥
उत्तिष्ठ दुष्टदमन सप्तद्वीपैकपालन ॥ त्वामेव शरणं प्रा
प्तः सर्वतो रक्ष रक्ष मां ॥ उत्तिष्ठ किं त्वं स्वपिषि किं तिष्ठसि
चिरायसि ॥ पाहि नः सर्वदा सर्वेभ्यो भयेभ्यः स्वसुतानि
च ॥ प्रतिभंगाः सर्वरोगा हानि शत्रूणां मुखभंजनं ॥ रिपूनां
च सभामध्ये सर्वैश्चावेजनं कुरु ॥ कार्तवीर्य के हृ
ष्टी कृतवीर्यसुतो बली ॥ सहस्रबाहुः शत्रुघ्नो रक्तवा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

साधनुर्धरः॥ रक्तगंधारक्तमाल्यो राजास्मर्तुरभीष्टदः
द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत्॥ संपदस्तस्य
जायंते जनास्तस्य वशंवदाः॥ राज्ञानो वशं तां यांति चित्र
येपि च वशं नयेत्॥ इदं स्तोत्रं पठेन्नित्यं सर्वकामफलप्र
दं॥ आनयत्याशु दूरस्थं क्षेमलाभयुतं प्रियं॥ सर्वसि
द्धिकरं स्तोत्रं जपतां सर्वसिद्धिदं॥ कार्तवीर्य महाबाहो
सर्वशत्रुनिबर्हण॥ सर्वत्र सर्वदा तिष्ठ चोरान्नाशय पा
हि मां॥ सहस्रबाहुं सहस्रशरं सचापं रक्तकिरीट
कुंडलं॥ चोरादिदुष्टभयनाशनमिष्टदं तं ध्यायेन्महा

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हैहयकार्त्तवीर्यं॥ पक्षेपंचदशातान्बाणान्सोमेपंचश
तंधनुः॥ कार्त्तवीर्यार्जुनोनामराजारक्षतुमांसदा॥
अग्निप्रतिष्ठाम्वाधाने होमेचविधिपूर्वकं॥ श्रीकार्त्त
वीर्यस्तोत्रंसंपूर्णं॥ बंधमोचने ६ विवादे ६ नपुंसके ७
भूतप्रेतपिशाच्यादिनाशने ३ वस्तुगते १२ परभंज
नार्थे ६ राजावश्यार्थे १० सिध्यै ८॥ श्रीकार्त्तवीर्या
र्पणमस्तु॥ शुभंभवतु॥ श्रीरस्तु॥ श्रीलक्ष्मीनाराय २
णंजयंती॥ छ॥ छ॥ श्रीब्राह्मणापदयाना॥ श्री॥
छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com